# तैत्तिरीयोपनिषत्

# मङ्गलाचरणम्

यस्माज्ज्ञातं जगत्सर्वं यस्मिन्नेव प्रलीयते।

येनेदं धार्यते चैव तस्मै ज्ञानात्मने नमः।। १

यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः।

व्याख्याताः सर्ववेदान्तास्तान्नित्यं प्रणतोस्म्यहम्।। २

तैत्तिरीयकसारस्य मयाचार्यप्रसादतः।

विस्पष्टार्थरुचीनां हि व्याख्येयं सम्प्रणीयते।। ३

**अथ भष्यावतरणिकाग्रन्थ-सम्बन्धः**

१) नित्यान्यधिगतानि कर्माणि उपात्त-दुरित-क्षयार्थानि, काम्यानि च फलार्थिनां पूर्वस्मिन्ग्रन्थे।

इदानीं कर्मोपादान-हेतु-परिहाराय ब्रह्म-विद्या प्रस्तूयते। कर्म-हेतुः कामः स्यात्, प्रवर्त्तकत्वात्।

आप्त-कामानां हि कामाभावे स्वात्मन्यवस्थानात् प्रवृत्यनुपपत्तिः। आत्म-कामत्वे चाऽऽप्त-कामता।

आत्मा हि ब्रह्म। तद्विदो हि पर-प्राप्तिं वक्ष्यति। अतोऽविद्या-निवृत्तौ स्वात्मन्यवस्थानं पर-प्राप्तिः।

अभयं प्रतिष्ठां विन्दते (तै. २.७)एतमानन्दमयमात्मानमुपसङ्क्रामति (तै. २.८)इत्यादि-श्रुतेः।

**पूर्वमीमांसक-पूर्वपक्षः - कर्ममात्राद् मोक्षः**

**पूर्वपक्षः - १**

२) काम्य-प्रतिषिद्धयोः अनारम्भात्, आरब्धस्य च उपभोगेन क्षयात्, नित्यानुष्ठानेन प्रत्यवायाभावात्, अयत्नतः

एव स्वात्मन्यवस्थानं मोक्षः।

**पूर्वपक्षः - २**

३) अथवा, निरतिशयायाः प्रीतेः स्वर्ग-शब्द-वाच्यायाः कर्म-हेतुत्वात् कर्मभ्य एव मोक्षः इति चेत्।

**सिद्धान्तः - कर्ममात्राद् न मोक्षः**
**अशेषकर्मक्षयासम्भवः**
**प्रथम-पूर्वपक्षस्य उत्तरम्**
४) न, कर्मानेकत्वात्। अनेकानि हि आरब्ध-फलानि, अनारब्ध-फलानि च, अनेक-जन्मान्तर-कृतानि, विरुद्ध-

फलानि कर्माणि सम्भवन्ति।

अतः तेषु अनारब्ध-फलानाम् एकस्मिन् जन्मन्युपभोग-क्षयासम्भवात् शेष-कर्म-निमित्त-शरीरारम्भोपपत्तिः।

कर्म-शेष-सद्भाव-सिद्धिश्च - तद्य इह रमणीयचरणाः (छा. ५.१०.७) ततः शेषेण (गौ.ध. २.२९, आ.ध.

२.२.२.३) इत्यादि-श्रुति-स्मृति-शतेभ्यः।

**नित्यकर्मभिः अनारब्धकर्मक्षयासम्भवः**
आक्षेपः ५) इष्टानिष्ट-फलानाम् अनारब्धानां क्षयार्थानि नित्यानीति चेत्।

समाधानम् न। अकरणे प्रत्यवाय-श्रवणात्। प्रत्यवाय-शब्दो हि अनिष्ट-विषयः।

नित्याकरण-निमित्तस्य प्रत्यवायस्य दुःख-रूपस्य आगामिनः परिहारार्थानि नित्यानीति अभ्युपगमात्, न

अनारब्ध-फल-कर्म-क्षयार्थानि।

यदि नाम अनारब्ध-कर्म-क्षयार्थानि नित्यानि कर्माणि, तथापि अशुद्धमेव क्षपयेयुः, न शुद्धम्, विरोधाभावात्। न

हि इष्ट-फलस्य कर्मणः शुद्ध-रूपत्वाद् नित्यैर्विरोधः उपपद्यते। शुद्धाशुद्धयोर्हि विरोधो युक्तः।

**अज्ञान-निमित्त-कामसत्वे न सर्वकर्मक्षयसंभवः**
न च कर्म-हेतूनां कामानां ज्ञानाभावे निवृत्यसम्भवाद् अशेष-कर्म-क्षयोपपत्तिः।

अनात्म-विदो हि कामः, अनात्म-फल-विषयत्वात्। स्वात्मनि च कामानुपपत्तिः, नित्य-प्राप्तत्वात्।

स्वयं च आत्मा परं ब्रह्म इत्युक्तम्।

**नित्याकरणस्य प्रत्यवायजनकत्वमपि न युक्तम्**
नित्यानां च अकरणम् अभावः। ततः प्रत्यवायानुपपत्तिः इति।

अतः पूर्वोपचित-दुरितेभ्यः प्राप्यमाणायाः प्रत्यवाय-क्रियायाः नित्याकरणं लक्षणमिति अकुर्वन् विहितं कर्म

(मनु. ११.४४) इति हि शतुर्नानुपपत्तिः। अन्यथा अभावाद् भावोत्पत्तिरिति सर्व-प्रमाण-व्याकोपः इति।

अतोऽयत्नतः स्वात्मन्यवस्थानम् इत्यनुपपन्नम्।

**स्वर्गप्राप्तिरपि न मोक्षः, आरब्धत्वात्**
**द्वितीय-पूर्वपक्षस्य उत्तरः**
६) यच्चोक्तं निरतिशय-प्रीतेः स्वर्ग-शब्द-वाच्यायाः कर्म-निमित्तत्वात् कर्मारब्धः एव मोक्षः इति।

तन्न। नित्यत्वान्मोक्षस्य। न हि नित्यं किञ्चिदारभ्यते लोके। यदारब्धं तदनित्यमिति।

अतो न कर्मारब्धो मोक्षः।

**विद्यासहितकर्मभ्योऽपि न मोक्षः**
**नित्यस्य अनारभ्यत्वम्**
आक्षेपः ७) विद्या-सहितानां कर्मणां नित्यारम्भ-सामर्थ्यमिति चेत्।

समाधानम् न, विरोधात्। नित्यं च आरभ्यते इति विरुद्धम्।

**मोक्षस्य भावरूपत्वाद् अनारभ्य-प्रध्वंसाभावः विषमदृष्टान्तः**
आक्षेपः ८) यद्विनष्टं तदेव नोत्पद्यते इति प्रध्वंसाभाववद् नित्योऽपि मोक्षः आरभ्यः एव इति चेत्।

समाधानम् न। मोक्षस्य भाव-रूपत्वात्। प्रध्वंसाभावोऽप्यारभ्यते इति न सम्भवति।

अभावस्य विशेषाभावात्, विकल्प-मात्रमेतत्। भाव-प्रतियोगी ह्यभावः।

यथा हि अभिन्नोऽपि भावो घट-पटादिभिर्विशेष्यते भिन्नः इव घट-भावः पट-भावः इति, एवं निर्विशेषोप्यभावः

क्रिया-गुण-योगाद् द्रव्यादिवद् विकल्प्यते।

न हि अभावः उत्पलादिवद् विशेषण-सह-भावी। विशेषणवत्वे भावः एव स्यात्।

कर्त्तृनित्यत्वादपि न मोक्षनित्यत्वम्

आक्षेपः ८) विद्या-कर्म-कर्त्तुः नित्यत्वाद् विद्या-कर्म-सन्तान-जनित-मोक्षस्य नित्यत्वमिति चेत्,

गङ्गा-श्रोतोवत्।

समाधानम् न। कर्त्तृत्वस्य दुःख-रूपत्वात्। कर्त्तृत्वोपरमे च मोक्ष-विच्छेदात्।

**ग्रन्थारम्भ-समर्थनम्**

९) तस्माद् अविद्यादि-कर्मोपादान-हेतु-निवृत्तौ स्वात्मन्यवस्थानं मोक्षः इति। स्वयं चाऽऽत्मा ब्रह्म। तद्विज्ञानाद्

अविद्या-निवृत्तिः मोक्षः इति। अतः ब्रह्मविद्यार्था उपनिषदारभ्यते।

## उपनिषत्-शब्द-निर्वचनम्

१०) उपनिषदिति विद्या उच्यते। तच्छीलिनां गर्भ-जन्म-जरादि-निशातनात्।

तदवसादनाद्वा। ब्रह्मणो वा उप-नि-गमयितृत्वात्। उप निषण्णं वा अस्यां परं श्रेयः इति।

तदर्थत्वात् ग्रन्थोऽप्युपनिषत्।।

# शीक्षावल्ली

## प्रथमोऽनुवाकः

### शान्तिपाठः

ॐ शं नो मित्रश्शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः ।

शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो ।

त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि ।

ऋतं वदिष्यामि । सत्यं वदिष्यामि ।

तन्मावतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥ १ ॥

ॐ शान्तिः शान्तिः शान्तिः

**भाष्यम्**

**देवताप्रार्थनम्**

११) शं सुखं प्राण-वृत्तेः अह्नश्चाभिमानी देवदात्मा मित्रः नः अस्माकं भवतु।

तथैव अपान-वृत्तेः रात्रेश्चाभिमानी देवदात्मा वरुणः। चक्षुषि आदित्ये च अभिमानी अर्यमा। बले इन्द्रः। वाचि बुद्धौ च बृहस्पतिः। विष्णुः उरुक्रमः विस्तीर्ण-क्रमः पादयोरभिमानी।

एवमाद्याः अध्यात्म-देवताः शं नः भवतु इति सर्वत्रानुषङ्गः।

तासु हि सुख-कृत्सु विद्या-श्रवण-धारणोपयोगाः अप्रतिबन्धेन भविष्यन्ति इति तत्सुख-कर्तृत्वं प्रार्थ्यते शन्नो भवतु इति।

**अपरब्रह्मस्तुतिः**
१२) ब्रह्म-विविदुषुणा नमस्कार-वदन-क्रिये वायु-विषये ब्रह्म-विद्योपसर्ग-शान्त्यर्थं क्रियेते।

सर्व-क्रिया-फलानां तदधीनत्वाद् ब्रह्म वायुः। तस्मै ब्रह्मणे नमः प्रह्वी-भावं करोमि इति वाक्य-शेषः।

नमः ते तुभ्यं हे वायो। नमस्करोमि इति परोक्ष-प्रत्यक्षाभ्यां वायुरेवाभिधीयते।

किञ्च, त्वमेव चक्षुराद्यपेक्ष्य बाह्यं सन्निकृष्टम् अव्यवहितं प्रत्यक्षं ब्रह्मासि यस्मात्, तस्मात् त्वामेव प्रत्यक्षं ब्रह्म

वदिष्यामि।

ऋतं यथा-शास्त्रं यथा-कर्त्तव्यं बुद्धौ सुपरिनिश्चितमर्थं तदपि त्वदधीनत्वात् त्वामेव वदिष्यामि।

सत्यम् इति स एव वाक्-कायाभ्यां सम्पाद्यमानः।

सोऽपि त्वदधीनः एव सम्पाद्यः इति त्वामेव सत्यं वदिष्यामि।

तत् सर्वात्मकं वाय्वाख्यं ब्रह्म मया एवं स्तुतं सद् मां विद्यार्थिनम् अवतु विद्या-संयोजनेन।

तद् एव ब्रह्म वक्तारम् आचार्यं वक्तृत्व-सामर्थ्य-संयोजनेन अवतु।

अवतु माम्, अवतु वक्तारम् इति पुनर्वचनम् आदरार्थम्।

**शान्त्यभिधानत्रयस्य प्रयोजनम्**

१३) ओं शान्तिः शान्तिः शान्तिः इति त्रिर्वचनम् आध्यात्मिकाधिभौतिकाधिदैविकानां विद्या-प्राप्त्युपसर्गाणां

प्रशमार्थम्।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये प्रथमोऽनुवाकः।।

## द्वितीयोऽनुवाकः

## शीक्षाध्यायः

**शीक्षां व्याख्यास्यामः। वर्णस्स्वरः। मात्रा बलम्। साम सन्तानः।**

**इत्युक्तश्शीक्षाध्यायः॥ १२॥**

**सम्बन्ध-भाष्यम्**

१४) अर्थ-ज्ञान-प्रधानत्वाद् उपनिषदः, ग्रन्थ-पाठे यत्नोपरमो मा भूद् इति शीक्षाध्यायः आरभ्यते।।

**शीक्षा-व्याख्यान-भाष्यम्**

१५) शिक्षा शिक्ष्यते अनयेति वर्णाद्युच्चारण-लक्षणम्। शिक्ष्यन्ते इति वा शिक्षाः वर्णादयः। शिक्षैव शीक्षा। दैर्घ्यं छान्दसम्। तां शीक्षां व्याख्यास्यामः विस्पष्टम् आ समन्तात् कथयिष्यामः।

चक्षिङो वा ख्याञादिष्टस्य व्याङ्-पूर्वस्य व्यक्त-वाक्कर्मणः एतद्रूपम्। तत्र वर्णः अकारादिः।

स्वरः उदात्तादिः। मात्रा ह्रस्वाद्याः। बलं प्रयत्न-विशेषः।

साम वर्णानां मध्यम-वृत्त्योच्चारणम्, समता। सन्तानः सन्ततिः। संहितेत्यर्थः।

एषः शिक्षितव्योऽर्थः। शिक्षा यस्मिन्नध्याये सोऽयं शीक्षाध्यायः इति एवम् उक्तः उदितः।

उक्तः इति उपसंहारार्थः।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये द्वितीयोऽनुवाकः।।

## तृतीयोऽनुवाकः

### संहितोपासना

अधुना संहितोपनिषदुच्यते।

सह नौ यशः। सह नौ ब्रह्मवर्चसम्। अथातस्सꣳहिताया उपनिषदं व्याख्यास्यामः। पञ्चस्वधिकरणेषु।

अधिलोकमधिज्यौतिषमधिविद्यमधिप्रजमध्यात्मम्। ता महासꣳहिता इत्याचक्षते। अथाधिलोकम्। पृथिवी

पूर्वरूपम्। द्यौरुत्तररूपम्। आकाशस्सन्धिः॥ १ ॥३ ॥१ ॥

वायुस्सन्धानम्। इत्यधिलोकम्। अथाधिज्यौतिषम्। अग्निः पूर्वरूपम्। आदित्य उत्तररूपम्।

आपस्सन्धिः। वैद्युतस्सन्धानम्। इत्यधिज्यौतिषम्। अथाधिविद्यम्। आचार्यः पूर्वरूपम् ॥ १ ॥३ ॥२ ॥

अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनꣳसन्धानम्। इत्यधिविद्यम्। अथाधिप्रजम्।

माता पूर्वरूपम्। पितोत्तररूपम्। प्रजा सन्धिः। प्रजननꣳसन्धानम्। इत्यधिप्रजम्॥ १॥३॥३॥

अथाध्यात्मम्। अधराहनुः पूर्वरूपम्। उत्तराहनुरुत्तररूपम्। वाक्सन्धिः। जिह्वा सन्धानम्। इत्यध्यात्मम्।

इतीमा महासꣳहिताः। य एवमेता महासꣳहिता व्याख्याता वेद। सन्धीयते प्रजया पशुभिः।

ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन॥ १॥३॥४॥

**उपासना-फल-प्रार्थनम्**

१६) तत्र संहितादि-उपनिषत्परिज्ञान-निमित्तं यद् यशः प्रार्थ्यते तद् नौ आवयोः शिष्याचार्ययोः सह एव अस्तु।

तन्निमित्तं च यद् ब्रह्म-वर्चसं तेजः तच्च सह एव अस्तु इति शिष्य-वचनम् आशीः।

शिष्यस्य हि अकृतार्थत्वात् प्रार्थना उपपद्यते। न आचार्यस्य, कृतार्थत्वात्। कृतार्थो हि आचार्यो नाम भवति।

**पञ्च संहितोपासनाधिकरणानि**

१७) अथ अनन्तरम् अध्ययन-लक्षण-विधानस्य, पूर्व-वृत्तस्य।

अतः यतः अत्यर्थं ग्रन्थ-भाविता बुद्धिः न शक्यते सहसा अर्थज्ञान-विषये अवतारयितुम् इत्यतः।

संहितायाः उपनिषदं संहिता-विषयं दर्शनम् इत्येतत्। ग्रन्थ-सन्निकृष्टाम् एव व्याख्यास्यामः।

पञ्चसु अधिकरणेषु आश्रयेषु, ज्ञान-विषयेषु इत्यर्थः।

कानि तानि इत्यतः आह - अधिलोकं लोकेष्वधि यद्दर्शनम्, तदधिलोकम्।

तथा अधिज्यौतिषम्, अधिविद्यम्, अधिप्रजम्, अध्यात्मम् इति।

ताः एताः पञ्च-विषयाः उपनिषदः लोकादि-महा-वस्तु-विषयत्वात् संहिता-विषयत्वाच्च,

महत्यश्च ताः संहिताश्च महासंहिताः इति आचक्षते कथयन्ति वेद-विदः।

**उपासना-क्रमः**

१८) अथ तासां यथोपन्यस्तानां मध्ये अधिलोकं दर्शनम् उच्यते। दर्शन-क्रम-विवक्षार्थः अथ-शब्दः सर्वत्र।

पृथिवी पूर्व-रूपम्। पूर्वो वर्णः पूर्व-रूपम्। संहितायाः पूर्वे वर्णे पृथिवी-दृष्टिः कर्त्तव्या इत्युक्तं भवति।

तथा च द्यौः उत्तर-रूपम्। आकाशः अन्तरिक्ष-लोकः सन्धिः मध्यं पूर्वोत्तर-रूपयोः।

सन्धीयेते अस्मिन् पूर्वोत्तर-रूपे इति। वायुः सन्धानम्। सन्धीयते अनेन इति सन्धानम्।

इति अधिलोकं दर्शनम् उक्तम्। अथ अधिज्यौतिषम् इत्यादि समानम्।

**संहितोपासना-फलम्**

१९) इतीमाः इत्युक्ताः उपप्रदर्श्यन्ते। यः कश्चिद् एवम् एताः महासंहिताः व्याख्याताः वेद उपास्ते।

वेद इति उपासनं स्यात्। विज्ञानाधिकारात्। इति प्राचीनयोग्योपास्व (तै. १.६)इति च वचनात्।

उपासनं च यथा-शास्त्रं तुल्य-प्रत्यय-सन्ततिः, असङ्कीर्णा च अतत्प्रत्ययैः, शास्त्रोक्तालम्बन-विषया च।

प्रसिद्धश्च उपासन-शब्दार्थो लोके - गुरुम् उपास्ते राजानम् उपास्ते इति।

यो हि गुर्वादीन् सन्ततम् उपचरति सः उपास्ते इत्युच्यते। सः च फलम् आप्नोति उपासनस्य।

अतोऽत्रापि य एवं वेद सन्धीयते प्रजादिभिः स्वर्गान्तैः। प्रजादिफलान्याप्नोति इत्यर्थः।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये तृतीयोऽनुवाकः।।

# चतुर्थोऽनुवाकः

## जप-होम-मन्त्राः

**सम्बन्ध-भाष्यम्**
२०)यश्छन्दसाम् इति मेधा-कामस्य श्री-कामस्य च तत्प्राप्ति-साधन-जपहोमौ उच्येते।

स मेन्द्रो मेधया स्पृणोतु, ततो मे श्रियमावह इति च लिङ्ग-दर्शनात्।।

यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात्संबभूव। स मेन्द्रो मेधया स्पृणोतु।

अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्।

ब्रह्मणः कोशोऽसि मेधया पिहितः। श्रुतं मे गोपाय। आवहन्ती वितन्वाना॥ १४१॥

कुर्वाणा चीरमात्मनः। वासा॑ꣳसि मम गावश्च। अन्नपाने च सर्वदा। ततो मे श्रियमावह।

लोमशां पशुभिः सह स्वाहा। आमा॑यन्तु ब्रह्मचारिणस्स्वाहा॒॑। विमा॑ऽऽयन्तु ब्रह्मचारिणस्स्वाहा॒॑। प्रमा॑यन्तु

ब्रह्मचारिणस्स्वाहा॒॑। दमा॑यन्तु ब्रह्मचारिणस्स्वाहा॒॑। शमा॑यन्तु ब्रह्मचारिणस्स्वाहा॒॑॥ १४२॥

यशो॑ जनेऽसानि स्वाहा॒॑। श्रेयान् वस्य॑सोऽसानि स्वाहा॒॑। तं त्वा॑ भग प्रविशा॑नि स्वाहा॒॑।

स मा॑ भग॑ प्रवि॑श स्वाहा॒॑। तस्मि॒॑न्त्सह॑स्रशाखे। निभ॑गाऽहं त्वयि॑ मृजे स्वाहा॒॑। यथापः॑ प्रवता॑ यन्ति। यथा

मासा॑ अहर्ज॑रम्। एवं॑ मां ब्रह्मचा॑रिणः। धात॑रायन्तु सर्वतस्स्वाहा॒॑।

प्रतिवे॑शोऽसि प्र मा॑ भाहि प्र मा॑ पद्यस्व॥ १४३॥

**मेधा-कामस्य जप-मन्त्राः**

२१) यः छन्दसां वेदानाम् ऋषभः इव ऋषभः, प्राधान्यात्। विश्व-रूपः सर्व-रूपः, सर्व-वाग्व्याप्तेः।

तद्यथा शङ्कुना (छा. २.२३.३) इत्यादि-श्रुत्यन्तरात्। अत एव ऋषभत्वम् ओङ्कारस्य।

ओङ्कारो ह्यत्र उपास्यः इति ऋषभादि-शब्दैः स्तुतिर्न्याया एव ओङ्कारस्य।

छन्दोभ्यः वेदेभ्यः। वेदाः हि अमृतम्। तस्मात् अमृतात् अधिसम्बभूव।

लोक-देव-वेद-व्याहृतिभ्यः सारिष्ठं जिघृक्षोः प्रजापतेः तपस्यतः ओङ्कारः सारिष्ठत्वेन प्रत्यभादित्यर्थः।

न हि नित्यस्य ओङ्कारस्य अञ्जसैव उत्पत्तिः अवकल्पते।

सः एवं-भूतः ओङ्कारः इन्द्रः सर्व-कामेशः परमेश्वरः मा मां मेधया प्रज्ञया स्पृणोतु प्रीणयतु बलयतु वा। प्रज्ञा-बलं हि प्रार्थ्यते।

अमृतस्य अमृतत्व-हेतु-भूतस्य ब्रह्म-ज्ञानस्य, तदधिकारात्, हे देव धारणः धारयिता भूयासं भवेयम्।

**कार्य-करण-योग्यता-प्राप्त्यर्थं प्रार्थना**

२२) किञ्च, शरीरं मे मम विचर्षणं विचक्षणं योग्यमित्येतत्। भूयात् इति प्रथम-पुरुष-विपरिणामः।

जिह्वा मे मम मधुमत्तमा मधुमती। अतिशयेन मधुर-भाषिणी इत्यर्थः।

कर्णाभ्यां श्रोत्राभ्यां भूरि बहु विश्रुवं व्यश्रवम्। श्रोता भूयासम् इत्यर्थः।

आत्म-ज्ञान-योग्यः कार्य-करण-सङ्घातोऽस्तु इति वाक्यार्थः। मेधा च तदर्थमेव हि प्रार्थ्यते।

**ज्ञानार्थं प्रार्थना**

२३) ब्रह्मणः परमात्मनः कोशः असि असेः इव उपलब्ध्यधिष्ठानत्वात्। त्वं हि ब्रह्मणः प्रतीकम्।

त्वयि ब्रह्म उपलभ्यते। मेधया लौकिक-प्रज्ञया पिहितः आच्छादितः।

स त्वं सामान्य-प्रज्ञैः अविदित-तत्वः इत्यर्थः। श्रुतं श्रवण-पूर्वकम् आत्म-ज्ञानादिकं विज्ञानं मे गोपाय रक्ष

तत्प्राप्त्यविस्मरणादिना। जपार्था एते मन्त्राः मेधा-कामस्य।

**श्री-कामस्य होम-मन्त्राः**

२४) होमार्थास्तु अधुना श्री-कामस्य मन्त्राः उच्यन्ते। आवहन्ती आनयन्ती वितन्वाना विस्तारयन्ती।

तनोतेः तत्कर्मत्वात्। कुर्वाणा निर्वर्तयन्ती अचीरम् अचिरं क्षिप्रमेव। छान्दसो दीर्घः। चिरं वा कुर्वाणा। आत्मनः

मम। किम् इत्याह - वासांसि वस्त्राणि मम गावश्च। गाश्च इति यावत्। अन्नपाने च।

सर्वदा एवमादीनि कुर्वाणा श्रीः या तां ततः मेधा-निर्वर्त्तनात् परम् आवह आनय।

अमेधसो हि श्रीः अनर्थाय एव इति। किं-विशिष्टाम्। लोमशाम् अज-अव्यादि-युक्ताम्।

अन्यैश्च पशुभिः संयुक्ताम्। आवह इति अधिकाराद् ओङ्कारः एव सम्बोध्यते।

स्वाहा, स्वाहाकारो होमार्थ-मन्त्रान्त-ज्ञापनार्थः।

**बहु-शिष्य-प्राप्त्यर्थं प्रार्थना**

२५) आ मा यन्तु इति। आयन्तु माम् इति व्यवहितेन सम्बन्धः।

ब्रह्मचारिणः विमायन्तु, प्रमायन्तु, दमायन्तु, शमायन्तु इत्यादि। यशो यशस्वी जने जनेसमूहे असानि भवानि।

श्रेयान् प्रशस्यतरः। वस्यसः वसीयसः वसुतराद् वसुमत्तराद्वा असानि इत्यन्वयः।

**ईश्वरैक्यार्थं प्रार्थना**

२६) किञ्च, तं ब्रह्मणः कोश-भूतं त्वा त्वां हे भग भगवन् पूजावन् प्रविशानि।

प्रविश्य च अनन्यः त्वदात्मा एव भवानि इत्यर्थः। सः त्वमपि मा मां भग भगवन् पूजावन् प्रविश।

आवयोरेकत्वमेव अस्तु।

**बहु-शिष्य-प्राप्त्यर्थ-प्रार्थनोपसंहारः**

२७) तस्मिन् त्वयि सहस्र-शाखे बहु-शाखा-भेदे निमृजे शोधयामि अहं पाप-कृत्याम्।

यथा लोके आपः प्रवता प्रवणवता निम्नवता देशेन यन्ति गच्छन्ति। यथा च मासाः अहर्जरम्।

संवत्सरो अहर्जरः, अहोभिः परिवर्त्तमानः लोकान् जरयति इति।

अहानि वा अस्मिन् जीर्यन्ति अन्तर्भवन्ति इति अहर्जरः।

तं च यथा मासाः यन्ति एवं मां ब्रह्मचारिणः हे धातः सर्वस्य विधातः माम् आयन्तु आगच्छन्तु सर्वतः सर्व-

दिग्भ्यः। प्रतिवेशः श्रमापनयन-स्थानम्। आसन्न-गृहमित्यर्थः। एवं त्वं प्रतिवेशः इव प्रतिवेशः।

त्वच्छीलिनां सर्व-पाप-दुःखापनयन-स्थानम् असि। अतो मा मां प्रति प्रभाहि प्रकाशय आत्मानम्।

प्र मा पद्यस्व प्रपद्यस्व च माम्, रस-विद्धम् इव लोहं त्वन्मयं त्वदात्मानं कुरु इत्यर्थः।

**विद्या-प्रकरणे धन-प्रार्थनायाः साङ्गत्यम्**

२८) श्रीकामोऽस्मिन् विद्या-प्रकरणे अभिधीयमानो धनार्थः। धनं च कर्मार्थम्। कर्म च उपात्त-दुरित-क्षयाय।

तत्क्षये हि विद्या प्रकाशते। तथा च स्मृतिः ज्ञानम् उत्पद्यते पुंसां क्षयात् पापस्य कर्मणः।

यथाऽऽदर्शतले प्रख्ये पश्यत्यात्मानम् आत्मनि(म.भा.शा. २०४.८ गरुड.पु. १.२३७.६) इति।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये चतुर्थोऽनुवाकः।।

# पञ्चमोऽनुवाकः

## व्याहृत्यात्म-ब्रह्मोपासना

**सम्बन्ध-भाष्यम्**

२९) संहिता-विषयम् उपासनम् उक्तम्। तदनु मेधा-कामस्य श्री-कामस्य च मन्त्राः अनुक्रान्ताः।

ते च पारम्पर्येण विद्योपयोगार्थाः एव।

अनन्तरं व्याहृत्यात्मनः ब्रह्मणः अन्तरुपासनं स्वाराज्य-फलं प्रस्तूयते।।

भूर्भुवस्सुवरिति वा एतास्तिस्रो व्याहृतयः। तासामु ह स्मै तां चतुर्थीम्। माहाचमस्यः प्रवेदयते। मह इति।

तद्ब्रह्म। स आत्मा। अङ्गान्यन्या देवताः। भूरिति वा अयं लोकः। भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोकः॥

१५१॥

मह इत्यादित्यः। आदित्येन वाव सर्वे लोका महीयन्ते। भूरिति वा अग्निः। भुव इति वायुः।

सुवरित्यादित्यः। मह इति चन्द्रमाः। चन्द्रमसा वाव सर्वाणि ज्योतीꣳषि महीयन्ते। भूरिति वा ऋचः। भुव

इति सामानि। सुवरिति यजूꣳषि॥ १५२॥

मह इति ब्रह्म। ब्रह्मणा वाव सर्वे वेदा महीयन्ते। भूरिति वै प्राणः। भुव इत्यपानः। सुवरिति व्यानः। मह

इत्यन्नम्। अन्नेन वाव सर्वे प्राणा महीयन्ते। ता वा एताश्चतस्रश्चतुर्धा। चतस्रश्चतस्रो व्याहृतयः। ता यो

वेद। स वेद ब्रह्म। सर्वेऽस्मै देवा बलिमावहन्ति॥ १५३॥

**भाष्यम्**

**चतस्रः व्याहृतयः**

३०) भूर्भुवस्सुवः इति। इति इति उक्त-उपप्रदर्शनार्थः। एतास्तिस्रः इति प्रदर्शितानां परामर्शार्थः।

परामृष्टाः स्मार्यन्ते वै इत्यनेन। तिस्रः एताः प्रसिद्धाः व्याहृतयः स्मार्यन्ते तावत्।

तासाम् इयं चतुर्थी व्याहृतिः महः इति।

ताम् एतां चतुर्थीं महाचमसस्य अपत्यं माहाचमस्यः प्रवेदयते – उ ह स्म इत्येतेषां वृत्तानुकथनार्थत्वात् –

विदितवान् ददर्श इत्यर्थः।

माहाचमस्य-ग्रहणम् आर्षानु-स्मरणार्थम्। ऋष्यनुस्मरणमपि उपासनाङ्गमिति गम्यते, इहोपदेशात्।

**मह-इति व्याहृतेः अङ्गित्वम्**
३१) येयं माहाचमस्येन दृष्टा व्याहृतिः मह इति, तद् ब्रह्म। महद् हि किल ब्रह्म। महती च व्याहृतिः।

किं पुनस्तत् स आत्मा। आप्नोतेः व्याप्ति-कर्मणः आत्मा।

इतराश्च व्याहृतयो लोकाः, देवाः, वेदाः, प्राणाश्च मह इत्यनेन व्याहृत्यात्मना

आदित्य-चन्द्र-ब्रह्मान्नभूतेन व्याप्यन्ते यतः, अतः अङ्गानि अवयवाः अन्याः देवताः।

देवता-ग्रहणम् उपलक्षणार्थं लोकादीनाम्। महः इत्येतस्य व्याहृत्यात्मनो देव-लोकादयः सर्वे अवयव-भूताः यतः,

अतः आह आदित्यादिभिः लोकादयो महीयन्ते इति। आत्मना हि अङ्गानि महीयन्ते।

महनं वृद्धिः, उपचयः। महीयन्ते वर्धन्ते इत्यर्थः।

**चतसृणां व्याहृतीनां प्रत्येकं चतुष्प्रकारत्वम्**
३२) अयं लोकः, अग्निः, ऋग्वेदः, प्राणः इति प्रथमा व्याहृतिः भूः इति।

एवमुत्तरोत्तरा एकैका चतुर्धा भवति। महः इति ब्रह्म। ब्रह्म इति ओङ्कारः।

शब्दाधिकारे अन्यस्यासम्भवात्। उक्तार्थमन्यत्।

**व्याहृतीनां चतुष्प्रकारत्वस्य पुनरुपदेशः उपासननियमार्थः**
३३) ता वा एताश्चतस्रश्चतुर्धा इति। ता वा एताः भूः, भुवः, सुवः, महः - इति चतस्रः एकैकशः चतुर्धा

चतुष्प्रकाराः। धा-शब्दः प्रकार-वचनः। चतस्रश्चतस्रः सत्यः चतुर्धा भवन्ति इत्यर्थः।

तासां यथा-क्लृप्तानां पुनरुपदेशः तथैव उपासन-नियमार्थः।

**व्याहृत्युपासनम् एकमेव - वक्ष्यमाणानुवाकेन एकवाक्यत्वात्**
३४) ताः यथोक्त-व्याहृतीः यो वेद, स वेद विजानाति। किम् ब्रह्म।

**आक्षेपः**
ननु तद् ब्रह्म, स आत्मा इति ज्ञाते ब्रह्मणि, न वक्तव्यम् अविज्ञातवत्, स वेद ब्रह्म इति।

**समाधानम्**
न। तद्विशेष-विवक्षुत्वाद् अदोषः। सत्यं विज्ञातं चतुर्थ-व्याहृत्यात्मा ब्रह्म इति।

न तु तद्विशेषः, हृदयान्तरुपलभ्यत्वं मनोमयत्वादिश्च शान्ति-समृद्धम् इत्येवमन्तः विशेषण-विशेष-रूपो धर्म-पूगो विज्ञायते इति। तद्विवक्षु हि शास्त्रम् अविज्ञातम् इव ब्रह्म मत्वा स वेद ब्रह्म इत्याह। अतो न दोषः।

यो हि वक्ष्यमाणेन धर्म-पूगेन विशिष्टं ब्रह्म वेद, स वेद ब्रह्म इत्यभिप्रायः।

अतो वक्ष्यमाणानुवाकेन एक-वाक्यता अस्य। उभयोर्हि अनुवाकयोः एकम् उपासनम्। लिङ्गाच्च।

भूरित्यग्नौ प्रतितिष्ठति (१.६.१) इत्यादिकं लिङ्गम् उपासनैकत्वे। विधायकाभावाच्च।

न हि वेद, उपासीत, इति वा विधायकः कश्चित् शब्दोऽस्ति व्याहृत्यनुवाके।

ता यो वेद इति च वक्ष्यमाणार्थत्वाद् न उपासना-भेदकः।

वक्ष्यमाणार्थत्वं च तद्विशेष-विवक्षुत्वात् इत्यादिना उक्तम्।

**अङ्गोपासनाफलम्**

३५) सर्वे देवाः अस्मै एवं-विदुषे अङ्ग-भूताः आवहन्ति आनयन्ति बलिं स्वाराज्य-प्राप्तौ सत्याम् इत्यर्थः।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये पञ्चमोऽनुवाकः।।

# षष्ठोऽनुवाकः

महः-व्याहृत्यात्मक-ब्रह्मणः उपासना-स्थानम्, विशेषणानि, प्राप्ति-मार्गश्चÉ

**सम्बन्धभाष्य**

३६) भूर्भुवः-सुवः-स्व-रूपाः महः इत्येतस्य हिरण्यगर्भस्य व्याहृत्यात्मनो ब्रह्मणः अङ्गान्यन्या देवताः इत्युक्तम्। यस्य ताः अङ्गभूताः, तस्य एतस्य ब्रह्मणः साक्षाद् उपलब्ध्यर्थम् उपासनार्थं च हृदयाकाशः स्थानम् उच्यते, शाल-ग्रामः इव विष्णोः। तस्मिन् हि तद् ब्रह्म उपास्यमानं मनोमयत्वादि-धर्म-विशिष्टं साक्षाद् उपलभ्यते, पाणौ इव आमलकम्। मार्गश्च सर्वात्म-भाव-प्रतिपत्तये वक्तव्यः इत्यनुवाकः आरभ्यते।।

स य एषोऽन्तर्हृदय आकाशः। तस्मिन्नयं पुरुषो मनोमयः। अमृतो हिरण्मयः। अन्तरेण तालुके। य एष

स्तन इवावलम्बते। सेन्द्रयोनिः। यत्रासौ केशान्तो विवर्तते। व्यपोह्य शीर्षकपाले। भूरित्यग्नौ प्रतितिष्ठति।

भुव इति वायौ ॥ १६१ ॥

सुवरित्यादित्ये। मह इति ब्रह्मणि। आप्नोति स्वाराज्यम्। आप्नोति मनसस्पतिम्। वाक्पतिश्चक्षुष्पतिः।

श्रोत्रपतिर्विज्ञानपतिः। एतत्ततो भवति। आकाशशरीरं ब्रह्म। सत्यात्म प्राणारामं मन आनन्दम्।

शान्तिसमृद्धममृतम्। इति प्राचीनयोग्योपास्स्व ॥ १६२

३७) सः इति व्युत्क्रम्य अयं पुरुषः इत्यनेन सम्बध्यते। य एषः अन्तर्हृदये हृदयस्यान्तः।

हृदयमिति पुण्डरीकाकारः, मांस-पिण्डः, प्राणायतनः, अनेक-नाडी-सुषिरः, ऊर्ध्व-नालः,

अधोमुखः, विशस्यमाने पशौ प्रसिद्धः उपलभ्यते।

तस्य अन्तः य एषः आकाशः प्रसिद्धः एव करकाकाशवत्।

तस्मिन् सः अयं पुरुषः। पुरि शयनात्। पूर्णाः वा भूरादयो लोकाः येन, इति पुरुषः।

मनोमयः मनः विज्ञानम्। मनुतेः ज्ञान-कर्मणः। तन्मयः तत्प्रायः तदुपलभ्यत्वात्।

मनुते अनेन इति वा मनः अन्तःकरणम्। तदभिमानी तन्मयः। तल्लिङ्गो वा। अमृतः अमरण-धर्मा।

हिरण्मयः ज्योतिर्मयः।

**उपासकस्य ब्रह्मप्राप्ति-मार्गः**

३८) तस्य एवं-लक्षणस्य हृदयाकाशे साक्षात्कृतस्य विदुषः आत्म-भूतस्य इन्द्रस्य ईदृश-स्वरूप-प्रतिपत्तये मार्गः

अभिधीयते। हृदयाद् ऊर्ध्वं प्रवृत्ता सुषुम्ना नाम नाडी योग-शास्त्रेषु च प्रसिद्धा।

सा च अन्तरेण मध्ये प्रसिद्धे तालुके तालुकयोः गता।

यः च एषः तालुकयोर्मध्ये स्तन इव अवलम्बते मांस-खण्डः तस्य च अन्तरेण इत्येतत्।

यत्र च असौ केशान्तः केशानाम् अन्तः अवसानं मूलं केशान्तः।

विवर्त्तते विभागेन वर्त्तते।

मूर्ध-प्रदेशः इत्यर्थः। तं देशं प्राप्य तत्र विनिःसृता।

व्यपोह्य विभज्य, विदार्य शीर्षकपाले शिरः-कपाले विनिर्गता या सा इन्द्रयोनिः।

इन्द्रस्य ब्रह्मणो योनिः मार्गः। स्वरूप-प्रतिपत्ति-द्वारम् इत्यर्थः।

**उपासना-फलम्**

३९) तया एवं विद्वान् मनोमयात्मदर्शी मूर्ध्नो विनिष्क्रम्य अस्य लोकस्य अधिष्ठाता भूरिति व्याहृति-रूपो योऽग्निः

महतो ब्रह्मणोऽङ्गभूतः, तस्मिन् अग्नौ प्रतितिष्ठति। अग्न्यात्मना इमं लोकं व्याप्नोति इत्यर्थः।

तथा भुव इति द्वितीय-व्याहृत्यात्मनि वायौ। प्रतितिष्ठति इत्यनुवर्त्तते। सुवरिति तृतीय-व्याहृत्यात्मनि आदित्ये।

मह इति अङ्गिनि चतुर्थ-व्याहृत्यात्मनि ब्रह्मणि प्रतितिष्ठति इति।

तेषु आत्म-भावेन स्थित्वा आप्नोति ब्रह्म-भूतः स्वाराज्यं स्वराड्-भावम्।

स्वयमेव राजा अधिपतिः भवति, अङ्ग-भूतानां देवानां यथा ब्रह्म।

देवाश्च सर्वे अस्मै अङ्गिने बलिम् आवहन्ति अङ्ग-भूताः, यथा ब्रह्मणे।

आप्नोति मनसस्पतिम्। सर्वेषां हि मनसां पतिः। सर्वात्मकत्वाद् ब्रह्मणः।

सर्वैः हि मनोभिः तद् मनुते। तदाप्नोत्येवं विद्वान्।

किञ्च, वाक्पतिः सर्वासां वाचां पतिर्भवति। तथैव चक्षुष्पतिः चक्षुषां पतिः।

श्रोत्रपतिः श्रोत्राणां च पतिः। विज्ञान-पतिः विज्ञानानां च पतिः।

सर्वात्मकत्वात् सर्व-प्राणिनां करणैः तद्वान् भवति इत्यर्थः।

**मह-व्याहृत्यात्मनः ब्रह्मणः विशेषणान्तराणि**

४०) किञ्च, ततः अपि अधिकतरम् एतद् भवति। किं तत् उच्यते - आकाश-शरीरम्।

आकाशः शरीरमस्य, आकाशवद् वा सूक्ष्मं शरीरमस्य इति आकाश-शरीरम्। किं तत् प्रकृतं ब्रह्म।

सत्यात्म सत्यं मूर्तामूर्तम्, अवितथं स्वरूपं च आत्मा स्वभावः अस्य तदिदं सत्यात्म।

प्राणारामं प्राणेषु आरामः आरमणम् आक्रीडा यस्य तत् प्राणारामम्।

प्राणानां वा आरामो यस्मिन् तत् प्राणारामम्।

मन-आनन्दम् आनन्द-भूतं सुख-कृदेव यस्य मनः तद् मन-आनन्दम्।

शान्तिसमृद्धं शान्तिः उपशमः, शान्तिश्च तत्समृद्धं च शान्ति-समृद्धम्।

शान्त्या वा समृद्धवद् उपलभ्यते इति शान्ति-समृद्धम्। अमृतम् अमरण-धर्मि।

एतच्च अधिकतरं विशेषणं तत्रैव मनोमयः इत्यादौ द्रष्टव्यम्।

**उपासनोपदेशविधिः उपसंहारश्च**
४१) इति एवं मनोमयत्वादि-धर्मैः विशिष्टं यथोक्तं ब्रह्म हे प्राचीनयोग्य उपास्स्व इति आचार्य-वचनोक्तिः

आदरार्था। उक्तस्तु उपासन-शब्दार्थः।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये षष्ठोऽनुवाकः।।

# सप्तमोऽनुवाकः

## पाङ्क्तब्रह्मोपासना

**सम्बन्ध-भाष्यम्**
४२) यदेतद् व्याहृत्यात्मकं ब्रह्म उपास्यमुक्तं, तस्यैव इदानीं पृथिव्यादि-पाङ्क्त -स्वरूपेण उपासनम् उच्यते।

पञ्च-सङ्ख्या-योगात् पङ्क्तिच्छन्दः-सम्पत्तिः। ततः पाङ्क्तत्वं सर्वस्य। पाङ्क्तश्च यज्ञः।

पञ्चाक्षरा पङ्क्तिः (तै.सं १.५.२), पाङ्क्तो यज्ञः (बृ. १.४.१७) इति श्रुतेः।

तेन यत्सर्वं लोकाद्यात्मान्तं च पाङ्क्तं परिकल्पयति यज्ञमेव तत्परिकल्पयति।

तेन यज्ञेन परिकल्पितेन पाङ्क्तात्मकं प्रजापतिम् अभिसम्पद्यते।

तत्कथं पाङ्क्तमिदं सर्वम् इति अत आह -

पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः। अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि।

आप ओषधयो वनस्पतय आकाश आत्मा। इत्यधिभूतम्। अथाध्यात्मम्।

प्राणो व्यानोऽपान उदानस्समानः। चक्षुश्श्रोत्रं मनो वाक् त्वक्। चर्म माꣳसꣳस्नावाऽस्थि मज्जा।

एतदधिविधाय ऋषिरवोचत्। पाङ्क्तं वा इदꣳ सर्वम्। पाङ्क्तेनैव पाङ्क्तꣳ स्पृणोतीति॥ १७॥

**बाह्य-पाङ्क्त-त्रयम्**

४३) पृथिवी, अन्तरिक्षम्, द्यौः, दिशः, अवान्तरदिशाः इति लोक-पाङ्क्तम्।

अग्निः, वायुः, आदित्यः, चन्द्रमाः, नक्षत्राणि इति देवता-पाङ्क्तम्।

आपः, ओषधयः, वनस्पतयः, आकाशः, आत्मा इति भूत-पाङ्क्तम्। आत्मेति विराट्, भूताधिकारात्।

इत्यधिभूतम् इति अधिलोकाधिदैवत-पाङ्क्त-द्वयोपलक्षणार्थम्। लोक-देवता-पाङ्क्तयोश्च अभिहितत्वात्।

**आध्यात्मिक-पाङ्क्त-त्रयम्**

४४) अथ अनन्तरम् अध्यात्मं पाङ्क्त-त्रयम् उच्यते। प्राणादि वायु-पाङ्क्तम्। चक्षुरादि इन्द्रिय-पाङ्क्तम्।

चर्मादि धातु-पाङ्क्तम्। एतावद् हि इदं सर्वम्। अध्यात्मं बाह्यं च पाङ्क्तमेव इति।

**पाङ्क्तोपासन-फलम्**

४५) एतद् एवम् अधिविधाय परिकल्प्य ऋषिः वेदः, एतद्दर्शन-सम्पन्नो वा कश्चिद् ऋषिः, अवोचत् उक्तवान्।

किम् इत्याह - पाङ्क्तं वा इदं सर्वम्। पापाङ्क्तेनैव आध्यात्मिकेन सङ्ख्या-सामान्यात् पाङ्क्तं बाह्यं स्पृणोति

बलयति, पूरयति।

एकात्मतया उपलभते इत्येतत्। एवं पाङ्क्तम् इदं सर्वम् इति यो वेद, स प्रजापत्यात्मा एव भवति इत्यर्थः।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये सप्तमोऽनुवाकः।।

# अष्टमोऽनुवाकः

## ओङ्कारोपासनम्

**सम्बन्ध-भाष्यम्**
४६) व्याहृत्यात्मनो ब्रह्मणः उपासनमुक्तम्। अनन्तरं च पाङ्क्त-स्वरूपेण तस्यैव उपासनमुक्तम्।

इदानीं सर्वोपासनाङ्ग-भूतस्य ओङ्कारस्य उपासनं विधित्स्यते।

परापर-ब्रह्म-दृष्ट्या हि उपास्यमानः ओङ्कारः, शब्द-मात्रोऽपि परापर-ब्रह्म-प्राप्ति-साधनं भवति।

स हि आलम्बनं ब्रह्मणः परस्य अपरस्य च। प्रतिमा इव विष्णोः।

एतेनैवायतनेन एकतरमन्वेति (प्र. ५.२) इति श्रुतेः।।

ओमिति ब्रह्म। ओमितीदꣳ सर्वम्। ओमित्येतदनुकृति ह स्म वा अप्यो श्रावयेत्याश्रावयन्ति।

ओमिति सामानि गायन्ति। ओꣳ शोमिति शस्त्राणि शꣳसन्ति। ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति।

ओमिति ब्रह्मा प्रसौति। ओमित्यग्नि-होत्रमनुजानाति। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति।

ब्रह्मैवोपाप्नोति॥ १८॥

**ओङ्कारोपासना-विधिः**

४७) ओमिति। इति-शब्दः स्वरूप-परिच्छेदार्थः।

ओम् इत्येतत् शब्द-रूपं ब्रह्म इति मनसा धारयेद् उपासीत। यतः ओमितीदं सर्वम्।

सर्वं हि शब्द-रूपम् ओङ्कारेण व्याप्तम्। तद्यथा शङ्कुना (छा. २.२३.३) इति श्रुत्यन्तरात्।

अभिधान-तन्त्रं हि अभिधेयम् इत्यतः इदं सर्वम् ओङ्कारः इत्युच्यते।

**ओङ्कार-स्तुतिः**
४८) ओङ्कार-स्तुत्यर्थम् उत्तरो ग्रन्थः, उपास्यत्वात् तस्य।

ओमित्येतद् अनुकृतिः अनुकरणम्।

करोमि यास्यामि वा इति कृतम् उक्तम् ओम् इति अनुकरोत्यन्यः। अतः ओङ्कारः अनुकृतिः।

ह स्म वै इति प्रसिद्धावद्योतकाः। प्रसिद्धं हि ओङ्कारस्य अनुकृतित्वम्।

अपि च ओ श्रावय इति प्रैष-पूर्वकम् आश्रावयन्ति प्रतिश्रावयन्ति। तथा ओमिति सामानि गायन्ति सामगाः।

ओं शोम् इति शस्त्राणि शंसन्ति शस्त्रशंसितारोऽपि। तथा ओमिति अध्वर्युः प्रतिगरं प्रतिगृणाति।

ओमिति ब्रह्मा प्रसौति अनुजानाति प्रैष-पूर्वकमाश्रावयति।

ओमिति अग्निहोत्रम् अनुजानाति।

जुहोमि इत्युक्त  ओम् इत्येव अनुज्ञां प्रयच्छति।

ओमिति एव ब्राह्मणः प्रवक्ष्यन् प्रवचनं करिष्यन् अध्येष्यमाणः ओम् इत्येव आह।

ओम् इति प्रतिपद्यते अध्येतुम् इत्यर्थः। ब्रह्म वेदम् उपाप्नवानि इति प्राप्नुयां ग्रहीष्यामि इति।

उपाप्नोति एव ब्रह्म।

अथवा, ब्रह्म परमात्मा तम् उपाप्नवानि इति आत्मानं प्रवक्ष्यन् प्रापयिष्यन् ओम् इत्येव आह।

स च तेन ओङ्कारेण ब्रह्म प्राप्नोति एव।

ओङ्कार-पूर्वं प्रवृत्तानां क्रियाणां फलवत्वं यस्मात्, तस्मात् ओङ्कारं ब्रह्म इति उपासीत इति वाक्यार्थः।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये अष्टमोऽनुवाकः।।

## नवमोऽनुवाकः

## कर्मणां पुरुषार्थसाधनत्व-प्रदर्शनम्

**सम्बन्ध-भाष्यम्**

४९) विज्ञानादेव आप्नोति स्वाराज्यम् (भाष्य-भागः १-३९) इति उक्तत्वात्, श्रौत-स्मार्त्तानां कर्मणाम् आनर्थक्यं

प्राप्तम् इत्यतः तन्मा प्रापद् इति कर्मणां पुरुषार्थं प्रति साधनत्व-प्रदर्शनार्थम् इह उपन्यासः।।

ऋतं च स्वाध्यायप्रवचने च। सत्यं च स्वाध्यायप्रवचने च। तपश्च स्वाध्यायप्रवचने च।

दमश्च स्वाध्यायप्रवचने च। शमश्च स्वाध्यायप्रवचने च। अग्नयश्च स्वाध्यायप्रवचने च।

अग्निहोत्रं च स्वाध्यायप्रवचने च। अतिथयश्च स्वाध्यायप्रवचने च। मानुषं च स्वाध्यायप्रवचने च।

प्रजा च स्वाध्यायप्रवचने च। प्रजनश्च स्वाध्यायप्रवचने च। प्रजातिश्च स्वाध्यायप्रवचने च।

सत्यमिति सत्यवचा राथीतरः। तप इति तपोनित्यः पौरुशिष्टिः।

स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः। तद्धि तपस्तद्धि तपः॥ १९॥

**उपासकस्य कर्त्तव्यानि कर्माणि**

५०) ऋतम् इति व्याख्यातम् (भाष्य-भागः १-१२)। स्वाध्यायः अध्ययनम्।

प्रवचनम् अध्यापनम्, ब्रह्म-यज्ञो वा। एतानि ऋतादीनि अनुष्ठेयानि इति वाक्य-शेषः।

सत्यं च सत्य-वचनम्, यथा-व्याख्यातार्थं वा (भाष्य-भागः १-१२)।

तपः कृच्छ्रादि। दमः बाह्य-करणोपशमः। शमः अन्तः-करणोपशमः। अग्नयः आधातव्याः।

अग्निहोत्रं च होतव्यम्। अतिथयश्च पूज्याः।

मानुषम् इति लौकिकः संव्यवहारः। तच्च यथा-प्राप्तम् अनुष्ठेयम्।

प्रजा च उत्पाद्या। प्रजनश्च प्रजननम्।

ऋतौ भार्या-गमनम् इत्यर्थः। प्रजातिः पौत्रोत्पत्तिः। पुत्रो निवेशयितव्यः इत्येतत्।

**स्वाध्यायप्रवचनयोः सर्वदा आदरः कार्यः**

५१) सर्वैः एतैः कर्मभिः युक्तस्यापि स्वाध्याय-प्रवचने यत्नतः अनुष्ठेये इत्येवमर्थं सर्वेण सह स्वाध्याय-प्रवचन-

ग्रहणम्। स्वाध्यायाधीनं हि अर्थ-ज्ञानम्। अर्थ-ज्ञानायत्तं च परं श्रेयः।

प्रवचनं च तदविस्मरणार्थं धर्म-प्रवृद्ध्यर्थं च। अतः स्वाध्याय-प्रवचनयोः आदरः कार्यः।

सत्यमिति सत्यमेव अनुष्ठातव्यमिति सत्यवचाः। सत्यमेव वचः यस्य सोऽयं सत्यवचाः, नाम वा तस्य।

राथीतरः रथीतरस्य गोत्रः राथीतराचार्यः मन्यते।

तप इति तप एव कर्त्तव्यमिति तपोनित्यः तपसि नित्यः तपः-परः। तपो-नित्यः इति वा नाम।

पौरु-शिष्टिः पुरुशिष्टस्यापत्यं पौरु-शिष्टिः आचार्यः मन्यते।

स्वाध्याय-प्रवचने एव अनुष्ठेये इति नाको नामतः, मुद्गलस्य अपत्यं मौद्गल्यः आचार्यः मन्यते।

तद्धि तपस्तद्धि तपः। हि यस्मात् स्वाध्याय-प्रवचने एव तपः, तस्मात् ते एव अनुष्ठेये इति।

उक्तानामपि सत्य-तपः-स्वाध्याय-प्रवचनानां पुनर्ग्रहणम् आदरार्थम्।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये नवमोऽनुवाकः।।

# दशमोऽनुवाकः

त्रिशङ्कोः विज्ञानप्राप्त्यनन्तर-वचनम् (ब्राह्मणवाक्यम्)

**मन्त्राम्नायः स्वाध्यायार्थः**
५२) अहं वृक्षस्य रेरिवा इति स्वाध्यायार्थो मन्त्राम्नायः। स्वाध्यायश्च विद्योत्पत्तये, प्रकरणात्।

विद्यार्थं हि इदं प्रकरणम्। न च अन्यार्थत्वम् अवगम्यते।

स्वाध्यायेन च विशुद्ध-सत्वस्य विद्योत्पत्तिः अवकल्प्यते।।

**अहं वृक्षस्य रेरिवा। कीर्त्तिः पृष्ठं गिरेरिव। ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि। द्रविणꣳसवर्चसम्। सुमेधा अमृतोक्षितः। इति त्रिशङ्कोर्वेदानुवचनम्॥ ११० ॥**

**आम्नायार्थः - त्रिशङ्कोः ब्रह्मविदः आत्मैकत्वदर्शनम्**

५३) अहं वृक्षस्य उच्छेद्यात्मकस्य संसार-वृक्षस्य रेरिवा प्रेरयिता अन्तर्याम्यात्मना।

कीर्त्तिः ख्यातिः गिरेः पृष्ठम् इव उच्छ्रिता मम।

ऊर्ध्व-पवित्रः ऊर्ध्वं कारणं पवित्रं पावनं ज्ञान-प्रकाश्यं परं ब्रह्म यस्य सर्वात्मनो मम, सोऽहम् ऊर्ध्व-पवित्रः।

वाजिनि इव वाजवति इव। वाजम् अन्नं तद्वति सवितरि (इव) इत्यर्थः।

यथा सवितरि अमृतम् आत्म-तत्त्वं विशुद्धं प्रसिद्धं श्रुति-स्मृति-शतेभ्यः, एवं स्वमृतं शोभनं विशुद्धम्

आत्म-तत्त्वम् अस्मि भवामि।

द्रविणं धनं सवर्चसं दीप्तिमत्। तदेव आत्म-तत्त्वम्। अस्मि इत्यनुवर्तते।

ब्रह्म-ज्ञानं वा आत्म-तत्त्व-प्रकाशकत्वात् सवर्चसं द्रविणम् इव द्रविणम्, मोक्ष-सुख-हेतुत्वात्।

अस्मिन् पक्षे प्राप्तं मया इति अध्याहारः कर्त्तव्यः।

सुमेधाः शोभना मेधा सर्वज्ञत्व-लक्षणा यस्य मम, सोऽहं सुमेधाः।

संसार-स्थित्युत्पत्त्युपसंहार-कौशल-योगात् सुमेधस्त्वम्। अतः एव अमृतः अमरण-धर्मा।

अक्षितः अक्षीणः अव्ययः। अक्षतो वा।

अमृतेन वा उक्षितः सिक्तः। अमृतोक्षितोऽहम् इत्यादि ब्राह्मणम्।

इति एवं त्रिशङ्कोः ऋषेः ब्रह्म-भूतस्य ब्रह्म-विदः वेदानुवचनं वेदः वेदनम् आत्मैकत्व-विज्ञानम्, तस्य प्राप्तिम्

अनु वचनं वेदानुवचनम्, आत्मनः कृत-कृत्यता-ख्यापनार्थम्।

वामदेववत् (ऐ. २.१.५, बृ. १.४.१०) त्रिशङ्कुना आर्षेण दर्शनेन दृष्टः मन्त्राम्नायः आत्म-विद्या-प्रकाशकः

इत्यर्थः।

**कर्मणः (परम्परया) विद्योत्पत्ति-हेतुत्व-प्रदर्शनम्**

५४) अस्य च जपः विद्योत्पत्त्यर्थः अवगम्यते। ऋतं च इत्यादि कर्मोपन्यासादनन्तरं च वेदानुवचन-पाठाद्

एतदवगम्यते। एवं श्रौत-स्मार्त्तेषु नित्येषु कर्मसु युक्तस्य निष्कामस्य, परं ब्रह्म विविदिषोः, आर्षाणि दर्शनानि

प्रादुर्भवन्ति आत्मादि-विषयाणि इति।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये दशमोऽनुवाकः।।

## एकादशोऽनुवाकः

### कर्त्तव्य-कर्मोपदेशः

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः ।

आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् ।

कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ १११ ॥

देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।

यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकꣳसुचरितानि ।

तानि त्वयोपास्यानि ॥ ११२ ॥

नो इतराणि। ये के चास्मच्छ्रेयाꣳसो ब्राह्मणाः। तेषां त्वयासनेन प्रश्वसितव्यम्। श्रद्धया देयम्।

अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।

अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ ११।३ ॥

ये तत्र ब्राह्मणास्सम्मर्शिनः। युक्ता आयुक्ताः। अलूक्षा धर्मकामास्स्युः। यथा ते तत्र वर्तेरन्।

तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु। ये तत्र ब्राह्मणास्सम्मर्शिनः। युक्ता आयुक्ताः।

अलूक्षा धर्मकामास्स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः।

एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमुचैतदुपास्यम्॥ ११।४ ॥

**सत्यादिकर्त्तव्यतोपदेशस्य प्रयोजनम्**

५५) वेदमनूच्य इत्येवमादि-कर्त्तव्यतोपदेशारम्भः प्राग्ब्रह्म-विज्ञानाद् नियमेन कर्त्तव्यानि श्रौत-स्मार्त्त-कर्माणि

इत्येवमर्थः।

अनुशासन-श्रुतेः पुरुष-संस्कारार्थत्वात्। संस्कृतस्य हि विशुद्ध-सत्त्वस्य आत्म-ज्ञानम् अञ्जसा एव उत्पद्यते।

तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते (मनु. १२.१०४) इति हि स्मृतिः।

वक्ष्यति च तपसा ब्रह्म विजिज्ञासस्व (तै. ३.२) इति। अतो विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि।

अनुशास्ति इति अनुशासन-शब्दात्, अनुशासनातिक्रमे हि दोषोत्पत्तिः।

प्रागुपन्यासाच्च कर्मणाम्। केवल-ब्रह्म-विद्यारम्भाच्च पूर्वं कर्माण्युपन्यस्तानि।

उदितायां च विद्यायाम् अभयं प्रतिष्ठां विन्दते (तै. २.७) न बिभेति कुतश्चन (तै. २.९), किमहं साधु

नाकरवम् (तै. २.९) इत्येवमादिना कर्म-नैष्किञ्चन्यं दर्शयिष्यति इत्यतः अवगम्यते पूर्वोपचित-दुरित-क्षय-द्वारेण

विद्योत्पत्त्यर्थानि कर्माणीति। मन्त्र-वर्णाच्च अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते (ईश. ११) इति।

**कर्मोपदेशावृत्तेः तात्पर्यम्**

५६) ऋतादीनां पूर्वत्रोपदेशः आनर्थक्य-परिहारार्थः। इह तु ज्ञानोत्पत्त्यर्थत्वात् कर्त्तव्य-नियमार्थः।

**शिष्यं प्रति आचार्यस्य अनुशासनम्**

**अनुष्ठेयानां सामान्यवचनम्**

५७) वेदम् अनूच्य अध्याप्य आचार्यः अन्तेवासिनं शिष्यम् अनुशास्ति ग्रन्थ-ग्रहणाद् अनु पश्चात् शास्ति तदर्थं

ग्राहयति इत्यर्थः। अतोऽवगम्यते अधीत-वेदस्य धर्म-जिज्ञासामकृत्वा गुरुकुलान्न समावर्त्तितव्यमिति।

बुद्ध्वा कर्माणि चारभेत् (आप.ध.सू. २.२१.५) इति स्मृतेः च।

कथमनुशास्ति इत्याह - सत्यं वद यथा-प्रमाणावगतं वक्तव्यं च तद्वद। तद्वद् धर्मं चर।

धर्मः इत्यनुष्ठेयानां सामान्य-वचनम्। सत्यादि-विशेष-निर्देशात्।

स्वाध्यायाद् अध्ययनाद् मा प्रमदः प्रमादं मा कार्षीः।

आचार्याय आचार्यार्थं प्रियम् इष्टं धनम् आहृत्य आनीय दत्त्वा विद्या-निष्क्रयार्थम्, आचार्येण च अनुज्ञातोऽनुरूपान् दारान् आहृत्य प्रजातन्तुं प्रजा-सन्तानं मा व्यवच्छेत्सीः प्रजा-सन्ततेर्विच्छित्तिः न कर्त्तव्या। अनुत्पद्यमानेऽपि पुत्रे पुत्र-काम्यादि-कर्मणा तदुत्पत्तौ यत्नः कर्त्तव्यः इत्यभिप्रायः, प्रजा-प्रजन-प्रजाति-त्रय-निर्देश-सामर्थ्यात्। अन्यथा प्रजनश्च इति एतदेकमेवावक्ष्यत्।

**अनुष्ठेयानां विशेषनिर्देशः**

५८) सत्याद् न प्रमदितव्यं प्रमादो न कर्त्तव्यः। सत्याच्च प्रमदनम् अनृत-प्रसङ्गः। प्रमाद-शब्द-सामर्थ्याद् विस्मृत्याप्यनृतं न वक्तव्यमित्यर्थः। अन्यथा असत्य-वदन-प्रतिषेधः एव स्यात्।

धर्माद् न प्रमदितव्यम्। धर्म-शब्दस्य अनुष्ठेय-विषयत्वात् अननुष्ठानं प्रमादः। स न कर्त्तव्यः।

अनुष्ठातव्य एव धर्म इति यावत्। एवं कुशलाद् आत्म-रक्षणार्थात् कर्मणः न प्रमदितव्यम्।

भूतिः विभूतिः तस्यै भूत्यै भूत्यर्थाद् मङ्गलयुक्तात् कर्मणः न प्रमदितव्यम्।

स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्।

स्वाध्यायः अध्ययनम्, प्रवचनम् अध्यापनम्, ताभ्यां न प्रमदितव्यम्।

ते हि नियमेन कर्त्तव्ये इत्यर्थः। तथा देव-पितृ-कार्याभ्यां न प्रमदितव्यम्। दैव-पित्र्ये कर्मणी कर्त्तव्ये।

मातृ-देवः माता देवो यस्य सः त्वं मातृ-देवो भव स्याः।

एवं पितृ-देवः, आचार्य-देवः, अतिथि-देवः भव। देवतावद् उपास्या एते इत्यर्थः।

**अनिन्दितकर्मणः कर्त्तव्यत्वम्**

५९) यानि अपि चान्यानि अनवद्यानि अनिन्दितानि शिष्टाचार-लक्षणानि कर्माणि, तानि सेवितव्यानि कर्त्तव्यानि त्वया। नो अकर्त्तव्यानि इतराणि सावद्यानि शिष्ट-कृतान्यपि।

यानि अस्माकम् आचार्याणां सुचरितानि शोभन-चरितानि आम्नायादि-अविरुद्धानि तानि एव त्वया उपास्यानि अदृष्टार्थानि अनुष्ठेयानि। नियमेन कर्त्तव्यानि इति यावत्।

नो इतराणि विपरीतानि, आचार्य-कृतान्यपि।

**गुरुजनेषु कर्त्तव्य-नियमः**

६०) ये के च अविशेषिताः आचार्यत्वादि-धर्मैः अस्मद् अस्मत्तः श्रेयांसः प्रशस्यतराः ते च ब्राह्मणाः न क्षत्रियादयः। तेषाम् आसनेन आसन-दानादिना त्वया प्रश्वसितव्यं प्रश्वसनं प्रश्वासः श्रमापनयः।

तेषां श्रमः त्वया अपनेतव्यः इत्यर्थः।

तेषां वा आसने गोष्ठी-निमित्ते समुदिते तेषु न प्रश्वसितव्यम्, प्रश्वासोऽपि न कर्त्तव्यः।

केवलं तदुक्त-सार-ग्राहिणा भवितव्यम्।

**दानविषये भावनानियमः**

६१) किञ्च यत्किञ्चिद् देयं तत् श्रद्धया एव दातव्यम्। अश्रद्धया अदेयम् न दातव्यम्।

श्रिया विभूत्या देयम् दातव्यम्। ह्रिया लज्जया देयम्। भिया च भयेन देयम्। संविदा च।

संविन्मित्रादि-कार्यम्।

**अनुष्ठानविषयक-संशये शिष्टाचारः प्रमाणम्**

६२) अथ एवं वर्त्तमानस्य यदि कदाचित् ते तव श्रौते स्मार्त्ते वा कर्मणि वृत्ते वा आचार-लक्षणे विचिकित्सा

संशयः स्याद् भवेत्। ये तत्र तस्मिन् देशे काले वा ब्राह्मणाः तत्र कर्मादौ – युक्ताः इति व्यवहितेन सम्बन्धः

कर्त्तव्यः – संमर्शिनः विचार-क्षमाः। युक्ताः अभियुक्ताः कर्मणि, वृत्ते वा आयुक्ताः अपर-प्रयुक्ताः।

अलूक्षाः अरूक्षाः, अक्रूर-मतयः। धर्मकामाः अदृष्टार्थिनः। अकाम-हताः इत्येतत्। स्युः भवेयुः।

ते यथा येन प्रकारेण ब्राह्मणाः तत्र तस्मिन् कर्मणि, वृत्ते वा वर्तेरन् तथा त्वमपि वर्तेथाः।

अथ अभ्याख्यातेषु। अभ्याख्याताः अभ्युक्ताः, दोषेण संदिह्यमानेन संयोजिताः केनचित्।

तेषु च यथोक्तं सर्वम् उपनयेद् ये तत्र इत्यादि।

**उपदेशोपसंहारः**

६३) एषः आदेशः विधिः। एषः उपदेशः पुत्रादिभ्यः पित्रादीनाम्।

एषा वेदोपनिषद् वेद-रहस्यम्, वेदार्थः इत्येतत्।

एतत् एव अनुशासनम् ईश्वर-वचनम् आदेश-वाच्यस्य विधेः उक्तत्वात्।

सर्वेषां वा प्रमाण-भूतानामनुशासनमेतत्। यस्मादेवम्, तस्माद् एवं यथोक्तं सर्वम् उपासितव्यं कर्त्तव्यम्।

एवम् उ च एतद् उपास्यम् उपास्यमेव चैतत्, नानुपास्यम् इत्यादरार्थं पुनर्वचनम्।

**श्रेयःसाधनविचारः**
**विचारविषयः**
६४) अत्रैतच्चिन्त्यते विद्या-कर्मणोः विवेकार्थम्। किं १) कर्मभ्यः एव केवलेभ्यः परं श्रेयः,

२) उत विद्या-सव्यपेक्षेभ्यः, ३) आहोस्विद् विद्या-कर्मभ्यां संहताभ्याम्, ४) विद्यायाः वा कर्मापेक्षायाः,

५) उत केवलायाः एव विद्यायाः इति।

**पूर्वपक्षः १**
**केवलकर्मभ्यः परं श्रेयः**
६५) तत्र केवलेभ्यः एव कर्मभ्यः स्यात्। समस्त-वेदार्थ-ज्ञानवतः कर्माधिकारात्।

वेदः कृत्स्नः अधिगन्तव्यः सरहस्यो द्विजन्मना (मनु. २.१६५) इति स्मरणात्।

अधिगमश्च सहोपनिषदर्थेन आत्म-ज्ञानादिना।

विद्वान् यजते विद्वान् याजयति इति च विदुषः एव कर्मण्यधिकारः प्रदर्श्यते सर्वत्र।

ज्ञात्वा चानुष्ठानम् इति च। कृत्स्नश्च वेदः कर्मार्थः इति हि मन्यन्ते केचित्।

कर्मभ्यश्चेत् परं श्रेयः नावाप्यते, वेदोऽनर्थकः स्यात्।

**सिद्धान्तः**
**केवलकर्मभ्यः न परं श्रेयः**
६६) न। नित्यत्वाद् मोक्षस्य। नित्यो हि मोक्षः इष्यते। कर्म-कार्यस्यानित्यत्वं प्रसिद्धं लोके।

कर्मभ्यश्चेत् श्रेयः, अनित्यं स्यात्। तच्च अनिष्टम्।

तद्यथा इह कर्मचितो लोकः क्षीयते (छा. ८.१.६) इति न्यायानुगृहीत-श्रुति-विरोधात्।

आक्षेपः ननु काम्य-प्रतिषिद्धयोरनारम्भात्, आरब्धस्य च कर्मणः उपभोगेन क्षयात्, नित्यानुष्ठानाच्च

प्रत्यवायानुपपत्तेः, ज्ञान-निरपेक्षः एव मोक्षः इति चेत्।

समाधानम् तच्च न। शेष-कर्म-सम्भवात् तन्निमित्त-शरीरान्तरोत्पत्तिः प्राप्नोति इति प्रत्युक्तम् (भाष्य-भागः १.४)।

कर्म-शेषस्य च नित्यानुष्ठानेन अविरोधात् क्षयानुपपत्तिरिति च।

यच्चोक्तं समस्त-वेदार्थ-ज्ञानवतः कर्माधिकारात् इत्यादि, तच्च न। श्रुत-ज्ञान-व्यतिरेकाद् उपासनस्य।

श्रुत-ज्ञान-मात्रेण हि कर्मणि अधिक्रियते, नोपासनम् अपेक्षते।

उपासनं च श्रुत-ज्ञानादर्थान्तरं विधीयते मोक्ष-फलम्। अर्थान्तर-प्रसिद्धिश्च स्यात्।

श्रोतव्यः (बृ. २.४.५) इत्युक्त्वा तद्व्यतिरेकेण मन्तव्यो निदिध्यासितव्यः (बृ. २.४.५) इति यत्नान्तर-विधानात्।

मनन-निदिध्यासनयोः च प्रसिद्धं श्रवण-ज्ञानादर्थान्तरत्वम्।

**पूर्वपक्षः २**
**विद्यासव्यपेक्ष-कर्मभ्यः परं श्रेयः**
६७) एवं तर्हि विद्या-सव्यपेक्षेभ्यः कर्मभ्यः स्याद् मोक्षः।

विद्या-सहितानां च कर्मणां भवेत् कार्यान्तरारम्भ-सामर्थ्यम्।

यथा स्वतो मरण-ज्वरादि-कार्यारम्भ-सामर्थ्यानामपि विष-दध्यादीनां मन्त्र-शर्करादि-संयुक्तानां कार्यान्तरारम्भ-

सामर्थ्यम्। एवं विद्या-सहितैः कर्मभिः मोक्षः आरभ्यते इति चेत्।

**सिद्धान्तः**
**विद्यासव्यपेक्ष-कर्मभ्यः अपि न परं श्रेयः**
६८) न। आरभ्यस्यानित्यत्वादिति उक्तो दोषः (भाष्य-भागः १.८)।

आक्षेपः वचनाद् आरभ्योऽपि नित्यः एवेति चेत्।

समाधानम् न। ज्ञापकत्वाद् वचनस्य। वचनं नाम यथा-भूतस्यार्थस्य ज्ञापकम्, न अविद्यमानस्य कर्तृ।

न हि वचन-शतेनापि नित्यम् आरभ्यते। आरब्धं वा अविनाशि भवेत्।

**पूर्वपक्षः ३**

**विद्याकर्मणोः समप्राधान्येन समुच्चितयोः मोक्षहेतुता इति तस्य निरासश्चÉ**

६९) एतेन विद्या-कर्मणोः संहतयोः मोक्षारम्भकत्वं प्रत्युक्तम्।

आक्षेपः विद्या-कर्मणी मोक्ष-प्रतिबन्ध-हेतु-निवर्त्तके इति चेत्।

समाधानम् न। कर्मणः फलान्तर-दर्शनात्। उत्पत्ति-संस्कार-विकाराप्तयो हि फलं कर्मणो दृश्यते।

उत्पत्यादि-फल-विपरीतश्च मोक्षः।

**मोक्षः आप्यः न**

आक्षेपः ७०) गति-श्रुतेः आप्यः इति चेत्। सूर्यद्वारेण (मु. १.२.११) तयोर्ध्वमायन् (कठ. २.३.१६, छा.

८.६.६) इत्येवमादि-गति-श्रुतिभ्यः प्राप्यो मोक्षः इति चेत्।

समाधानम् न। सर्व-गतत्वात्, गन्तृभिश्च अनन्यत्वात्।

आकाशादि-कारणत्वात् सर्व-गतं ब्रह्म। ब्रह्माव्यतिरिक्ताश्च सर्वे विज्ञानात्मनः। अतो नाप्यो मोक्षः। गन्तुः

अन्यद्विभिन्न-देशं च भवति गन्तव्यम्।

न हि येनैव अव्यतिरिक्तं यत् तत्तेनैव गम्यते। तदनन्यत्व-प्रसिद्धिश्च तत्सृष्ट्वा तदेवानुप्राविशत् (तै. २.६)

क्षेत्रज्ञं चापि मां विद्धि (गी. १३.२) इत्येवमादि-श्रुति-स्मृति-शतेभ्यः।

**गत्यैश्वर्यादिश्रुतेः कार्यब्रह्मविषयत्वम्**

आक्षेपः ७१) गत्यैश्वर्यादि-श्रुति-विरोधः इति चेत्।

अथापि स्यात्, यद्यप्राप्यः मोक्षः, तदा गतिश्रुतीनाम्, स एकधा (छा. ७.२६.२) स यदि पितृ-लोक-कामः

भवति (छा. ८.२.१) स्त्रीभिर्वा यानैर्वा (छा. ८.१२.३) इत्यादि-श्रुतीनां च, कोपः स्याद् इति चेत्।

समाधानम् न। कार्य-ब्रह्म-विषयत्वात् तासाम्। कार्ये हि ब्रह्मणि स्त्र्यादयः स्युः, न कारणे।

एकमेवाद्वितीयम् (छा. ६.२.१), यत्र नान्यत् पश्यति (छा. ७.२४.१) तत्केन कं पश्येत् (बृ. २.४.१४,

४.५.१५) इत्यादि-श्रुतिभ्यः।

**मिथो विरोधाद् ज्ञानकर्मसमुच्चय एव अनुपपन्नः**

७२) विरोधाच्च विद्या-कर्मणोः समुच्चयानुपपत्तिः। प्रविलीन-कर्त्रादि-कारक-विशेष-तत्त्व-विषया हि विद्या,

तद्विपरीत-कारक-साध्येन कर्मणा विरुध्यते।

न हि एकं वस्तु परमार्थतः कर्त्तृत्वादि-विशेषवत्, तच्छून्यं च, इति उभयथा द्रष्टुं शक्यते।

अवश्यं हि अन्यतरद् मिथ्या स्यात्।

अन्यतरस्य च मिथ्यात्व-प्रसङ्गे युक्तं यत्स्वाभाविकाज्ञान-विषयस्य द्वैतस्य मिथ्यात्वम्।

यत्र हि द्वैतमिव भवति (बृ. २.४.१४) मृत्योः स मृत्युमाप्नोति (कठ. २.१.१०),

अथ यत्र अन्यत् पश्यति ...तदल्पम् (छा. ७.२४.१), अन्योऽसावन्योऽहमस्मि (बृ. १.४.१०),

उदरमन्तरं कुरुते अथ तस्य भयं भवति (तै. २.७) इत्यादि-श्रुति-शतेभ्यः।

सत्यत्वं च एकत्वस्य - एकधैवानुद्रष्टव्यम् (बृ. ४.४.२०), एकमेवाद्वितीयम् (छा. ६.२.१),

ब्रह्मैवेदं सर्वम् (नृ.उ.ता. ७.३), आत्मैवेदं सर्वम् (छा. ७.२५.२) इत्यादि-श्रुति-शतेभ्यः।

न च सम्प्रदानादि-कारक-भेदादर्शने कर्म उपपद्यते।

अन्यत्व-दर्शनापवादाश्च विद्या-विषये सहस्रशः श्रूयन्ते। अतो विरोधो विद्या-कर्मणोः।

अतश्च समुच्चयानुपपत्तिः।

तत्र यदुक्तं संहताभ्यां विद्या-कर्मभ्यां मोक्षः इति, अनुपपन्नं तत्।

**आक्षेपः**
**निर्विशेष-ब्रह्मोपदेशे कर्मविधिश्रुतीनाम् विरोधः इति**
७३) विहितत्वात् कर्मणां श्रुति-विरोधः इति चेत्। यदि उपमृद्य कर्त्रादि-कारक-विशेषम् आत्मैकत्व-विज्ञानं

विधीयते सर्पादि-भ्रान्ति-विज्ञानोपमर्दक-रज्ज्वादि-विषय-विज्ञानवत्, तर्हि प्राप्तः कर्म-विधि-श्रुतीनां निर्विषयत्वाद्

विरोधः। विहितानि च कर्माणि। स च विरोधो न युक्तः, प्रमाणत्वात् श्रुतीनाम्, इति चेत्।

**समाधानम्**
**निर्विशेष-ब्रह्मोपदेशे कर्मविधिश्रुतीनाम् अविरोधः इति**
७४) न। पुरुषार्थोपदेश-परत्वात् श्रुतीनाम्। विद्योपदेश-परा तावत् श्रुतिः संसारात् पुरुषः मोक्षयितव्यः इति,

संसार-हेतोः अविद्यायाः विद्यया निवृत्तिः कर्त्तव्या इति, विद्या-प्रकाशकत्वेन प्रवृत्ता इति न विरोधः।

आक्षेपः एवमपि कर्त्रादि-कारक-सद्भाव-प्रतिपादन-परं शास्त्रं विरुध्यते एव इति चेत्।

समाधानम् न।

यथा-प्राप्तमेव कारकास्तित्वमुपादाय उपात्त-दुरित-क्षयार्थं कर्माणि विदधत् शास्त्रं मुमुक्षूणाम् फलार्थिनां च फल-

साधनम्, न कारकास्तित्वे व्याप्रियते।

उपचित-दुरित-प्रतिबन्धस्य हि विद्योत्पत्तिः नावकल्पते। तत्क्षये च विद्योत्पत्तिः स्यात्।

ततश्च अविद्या-निवृत्तिः, ततः आत्यन्तिकः संसारोपरमः।

**कर्मणः काममूलत्वादपि विद्याकर्मणोः विरोधः**

७५) अपि च, अनात्म-दर्शिनो हि अनात्म-विषयः कामः। कामयमानश्च करोति कर्माणि।

ततः तत्फलोपभोगाय शरीराद्युपादान-लक्षणः संसारः।

तद्व्यतिरेकेण, आत्मैकत्व-दर्शिनः विषयाभावात् कामानुपपत्तिः।

आत्मनि च अनन्यत्वात् कामानुपपत्तौ स्वात्मन्यवस्थानं मोक्षः इति। अतोऽपि विद्या-कर्मणोः विरोधः।

**चतुर्थपूर्वपक्षस्य (४) समाधानम्**
**कर्मोपसर्जनविद्यायाः मोक्षः इत्यस्य निरासः**
७६) विरोधादेव च विद्या मोक्षं प्रति न कर्माण्यपेक्षते।

**विद्या स्वोत्पत्तौ कर्माणि अपेक्षते एव**
७७) स्वात्म-लाभे तु पूर्वोपचित-दुरित-प्रतिबन्धापनयन-द्वारेण विद्या-हेतुत्वं प्रतिपद्यन्ते कर्माणि नित्यानि इति।

अतः एव अस्मिन् प्रकरणे उपन्यस्तानि कर्माणि इति अवोचाम (भाष्य.भागः १-५५)।

एवं च अविरोधः कर्म-विधि-श्रुतीनाम्। अतः केवलायाः एव विद्यायाः परं श्रेयः इति सिद्धम्।

**कर्मानेकत्वाद् विद्या गार्हस्थ्यकर्माणि एव अपेक्षते इति नियमो न (सन्यासाश्रमसिद्धिः)**
**पूर्वपक्षः**
७८) एवं तर्हि आश्रमान्तरानुपपत्तिः, कर्म-निमित्तत्वाद् विद्योत्पत्तेः। गार्हस्थ्ये च विहितानि कर्माणि इति

ऐकाश्रम्यम् एव। अतश्च यावज्जीवादि-श्रुतयः अनुकूलतराः स्युः।

**सिद्धान्तः**
७९) न। कर्मानेकत्वात्। न हि अग्निहोत्रादीन्येव कर्माणि।

ब्रह्मचर्यं, तपः, सत्य-वचनं, शमः, दमः, अहिंसा - इत्येवमादीन्यपि कर्माणि इतराश्रम-प्रसिद्धानि विद्योत्पत्तौ

साधकतमानि असङ्कीर्णत्वात् विद्यन्ते ध्यान-धारणादि-लक्षणानि च। वक्ष्यति च - तपसा ब्रह्म विजिज्ञासस्व

(तै. ३.२) इति।

जन्मान्तर-कृत-कर्मभ्यश्च प्रागपि गार्हस्थ्याद् विद्योत्पत्ति-सम्भवात्।

कर्मार्थत्वाच्च गार्हस्थ्य-प्रतिपत्तेः, कर्म-साध्यायां च विद्यायां सत्यां गार्हस्थ्य-प्रतिपत्तिः अनर्थिकैव। लोकार्थत्वाच्च

पुत्रादीनाम्।

पुत्रादि-साध्येभ्यश्च अयं लोकः पितृ-लोकः देव-लोकः (बृ. १.५.१६)

- इत्येतेभ्यः व्यावृत्त-कामस्य, नित्य-सिद्धात्म-लोक-दर्शिनः, कर्मणि प्रयोजनमपश्यतः,

कथं प्रवृत्तिः उपपद्यते प्रतिपन्न-गार्हस्थ्यस्यापि विद्योत्पत्तौ विद्या-परिपाकाद् विरक्तस्य कर्मसु प्रयोजनमपश्यतः

कर्मभ्यो निवृत्तिरेव स्यात्।

प्रव्रजिष्यन् वा अरे अहमस्मात् स्थानाद् अस्मि (बृ. ४.५.२) इत्येवमादि-श्रुति-लिङ्ग-दर्शनात्।

**कर्म प्रति श्रुतेः यत्नाधिक्य-विचारः**
**पूर्वपक्षः**
८०) कर्म प्रति श्रुतेः यत्नाधिक्य-दर्शनादयुक्तमिति चेत्। अग्निहोत्रादि-कर्म प्रति श्रुतेः अधिको यत्नः।

महांश्च कर्मण्यायासः। अनेक-साधन-साध्यत्वादग्निहोत्रादीनाम्।

तपो-ब्रह्मचर्यादीनां च इतराश्रम-कर्मणां गार्हस्थ्येपि समानत्वात्, अल्प-साधनापेक्षत्वाच्च इतरेषां, न युक्तः

तुल्यवद्विकल्पः आश्रमिभिः तस्य इति चेत्।

**सिद्धान्तः**
८१) न। जन्मान्तर-कृतानुग्रहात्। यदुक्तं कर्मणि श्रुतेः अधिको यत्नः इत्यादि, नासौ दोषः।

यतो जन्मान्तर-कृतमपि अग्निहोत्रादि-लक्षणं कर्म ब्रह्मचर्यादि-लक्षणं च अनुग्राहकं भवति विद्योत्पत्तिं प्रति।

येन च जन्मना एव विरक्ताः दृश्यन्ते केचित्। केचित्तु कर्मसु प्रवृत्ताः अविरक्ताः विद्याविद्वेषिणः।

तस्माद् जन्मान्तर-कृत-संस्कारेभ्यः विरक्तानाम् आश्रमान्तर-प्रतिपत्तिरेव इष्यते। कर्मफल-बाहुल्याच्च।

पुत्र-स्वर्ग-ब्रह्मवर्चसादि-लक्षणस्य कर्म-फलस्य असङ्ख्येयत्वात्, तत्प्रति च पुरुषाणां काम-बाहुल्यात्, तदर्थः

श्रुतेः अधिको यत्नः कर्मसु उपपद्यते। आशिषां बाहुल्य-दर्शनात् - इदं मे स्याद्, इदं मे स्यात्इति। उपायत्वाच्च।

उपाय-भूतानि हि कर्माणि विद्यां प्रति इत्यवोचाम (भाष्य.भागः १.७४)।

उपाये च अधिको यत्नः कर्त्तव्यः, न उपेये।

**विद्यां प्रति श्रवणादीनां साक्षाद् साधनत्वम्**

**पूर्वपक्षः**

८२) कर्म-निमित्तत्वाद् विद्यायाः, यत्नान्तरानर्थक्यमिति चेत्। कर्मभ्यः एव पूर्वोपचित-दुरित-प्रतिबन्ध-क्षयादेव

विद्या उत्पद्यते चेत्, कर्मभ्यः पृथग् उपनिषच्छ्रवणादि-यत्नः अनर्थकः इति चेत्।

**सिद्धान्तः**

८३) न। नियमाभावात्।

न हि प्रतिबन्ध-क्षयादेव विद्या उत्पद्यते, न तु ईश्वर-प्रसाद-तपो-ध्यानाद्यनुष्ठानाद् इति नियमः अस्ति। अहिंसा-

ब्रह्मचर्यादीनां च विद्यां प्रति उपकारकत्वात्। साक्षादेव च कारणत्वात् श्रवण-मनन-निदिध्यासनानाम्।

**उपसंहारः**

८४) अतः सिद्धानि आश्रमान्तराणि। सर्वेषां च अधिकारः विद्यायाम्।

परं च श्रेयः केवलायाः विद्यायाः एवेति सिद्धम्।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये एकादशोऽनुवाकः।।

# द्वादशोऽनुवाकः

**शान्तिपाठः**
अतीत-विद्या-प्राप्त्युपसर्ग-शमनार्थं शान्तिं पठति -

**ॐ शं नो मित्रश्शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषम्। ऋतमवादिषम्। सत्यमवादिषम्। तन्मामावीत्। तद्वक्तारमावीत्। आवीन्माम्। आवीद्वक्तारम्॥ १ ॥**

**ॐ शान्तिः शान्तिः शान्तिः**

व्याख्यातमेतत्पूर्वम्।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषत्-शीक्षावल्ली-भाष्ये द्वादशोऽनुवाकः।।